## श्याद्व्यधास्रुसंस्र्वतीणवसावहृलिहश्लिषश्वसश्च । (१४१/२९०३)

अनुपसर्गात् इति, विभाषा इति च निवृत्तम् । [1]श्यैङः, आकारान्तेभ्यश्च धातुभ्यः, व्यध आस्रु संस्रु [2]अतीण् अवसा अवहृ लिह श्लिष श्वस इत्येतेभ्यश्च[3] ण प्रत्ययो भवति । आकारान्तत्वादेव श्यायतेः [4]प्रत्यये सिद्धे पुनर्वचनं बाधकबाधनार्थम् । उपसर्गे कं (३.१.१३६/२८९८) बाधित्वाऽयमेव भवति । अवश्यायः । प्रतिश्यायः । दायः । धायः । [5]व्याधः । आस्रावः । संस्रावः । अत्यायः । अवसायः । अवहारः । लेहः । श्लेषः । श्वासः ॥

## दुन्योरनुपसर्गे । (१४२/२९०४)

दुनोतेर्नयतेश्चानुपसर्गे णप्रत्ययो भवति । दुनोति इति दावः । नयति इति नायः । अनुपसर्गे इति किम् ? प्रदवः । प्रणयः (३.१.१३४/२८९६) ॥

## विभाषा ग्रहः । (१४३/२९०५)

विभाषा ग्रहेः धातोः णप्रत्ययो भवति । अचः (३.१.१३४/२८९६) अपवादः । ग्राहः, ग्रहः । व्यवस्थितविभाषा चेयम् । [6]जलचरे नित्यं ग्राहः । ज्योतिषि नेष्यते, तत्र ग्रहः एव ।

[२२७] भवतेश्च इति वक्तव्यम् ।

[7]भवति इति भावः, भवः ॥

## गेहे कः । (१४४/२९०६)

ग्रहेर्धातोः कप्रत्ययो भवति गेहे कर्तरि[8] । [9]गृहं वेश्म । तात्स्थ्यात् दाराश्च । गृह्णन्ति इति [10]गृहाः दाराः । [11]गृहाणि वेश्मानि ॥

## शिल्पिनि ष्वुन् । (१४५/२९०७)

धातोः ष्वुन् प्रत्ययो भवति शिल्पिनि कर्तरि ।

[२२८] नृतिखनिरञ्जिभ्यः परिगणनं कर्तव्यम् ।

[12]नर्तकः । [13]खनकः । [14]रजकः । नर्तकी । [15]खनकी । रजकी । रञ्जेरनुनासिकलोपश्च ॥

---

1. श्यैङ् गतौ फ. 2. अतिपूर्व इण् फ. 3. धातुभ्यः इत्यधिकम् क. 4. णप्रत्यये ब.ग, णप्रत्यये सिद्धे वचनं क. 5. व्याधः नास्ति फ. 6. नित्यम् नास्ति फ, जलचरे ग्राह एव । ज्योतिषि ग्रह एव ब.क.फ. 7. भवति इति नास्ति क. 8. वाच्ये इत्यधिकम् फ. 9. गेहं ब.ड.फ. 10. गृहं ग, नास्ति फ. 11. गृहं वेश्म अ.क.ड.फ. 12. नृती गात्रविक्षेपे इत्यधिकम् अ.फ, नृती गात्रविनामे इत्यधिकम् ब. 13. खन अवदारणे इत्यधिकम् अ, खनुञ् विदारणे इत्यधिकम् ब. 14. रञ्ज रागे इत्यधिकम् अ.ब. 15. खनकी नास्ति ब.